॥ वाल्मीकि रामायण॥

५ सुन्दरकाण्ड

अध्याय १५

ततः कुमुदषण्डाभो निर्मलं निर्मलः स्वयम् ।
प्रजगाम नभश्चन्द्रो हंसो नीलमिवोदकम् ॥१॥

साचिव्यमिव कुर्वन्स प्रभया निर्मलप्रभः ।
चन्द्रमा रश्मिभिः शीतैः सिषेवे पवनात्मजम् ॥२॥

स ददर्श ततः सीतां पूर्णचन्द्रनिभाननाम् ।
शोकभारैरिव न्यस्तां भारैर्नावमिवाम्भसि ॥३॥

दिदृक्षमाणो वैदेहीं हनूमान्मारुतात्मजः ।
स ददर्शाविदूरस्था राक्षसीर्घोरदर्शनाः ॥४॥

एकाक्षीमेककर्णां च कर्णप्रावरणां तथा ।
अकर्णां शङ्कुकर्णां च मस्तकोच्छ्वासनासिकाम् ॥५॥

अतिकायोत्तमाङ्गीं च तनुदीर्घशिरोधराम् ।
ध्वस्तकेशीं तथाकेशीं केशकम्बलधारिणीम् ॥६॥

लम्बकर्णललाटां च लम्बोदरपयोधराम् ।
लम्बौष्ठीं चिबुकौष्ठीं च लम्बास्यां लम्बजानुकाम् ॥७॥

ह्रस्वां दीर्घां च कुब्जां च विकटां वामनां तथा ।
करालां भुग्नवस्त्रां च पिङ्गाक्षीं विकृताननाम् ॥८॥

विकृताः पिङ्गलाः कालीः क्रोधनाः कलहप्रियाः ।
कालायसमहाशूलकूटमुद्गरधारिणीः ॥९॥

वराहमृगशार्दूलमहिषाजशिवा मुखाः ।
गजोष्ट्रहयपादाश्च निखातशिरसोऽपराः ॥१०॥

एकहस्तैकपादाश्च खरकर्ण्यश्वकर्णिकाः ।
गोकर्णीर्हस्तिकर्णीश्च हरिकर्णीस्तथापराः ॥११॥

अनासा अतिनासाश्च तिर्यन्नासा विनासिकाः ।
गजसंनिभनासाश्च ललाटोच्छ्वासनासिकाः ॥१२॥

हस्तिपादा महापादा गोपादाः पादचूलिकाः ।
अतिमात्रशिरोग्रीवा अतिमात्रकुचोदरीः ॥१३॥

अतिमात्रास्य नेत्राश्च दीर्घजिह्वानखास्तथा ।
अजामुखीर्हस्तिमुखीर्गोमुखीः सूकरीमुखीः ॥१४॥

हयोष्ट्रखरवक्त्राश्च राक्षसीर्घोरदर्शनाः ।
शूलमुद्गरहस्ताश्च क्रोधनाः कलहप्रियाः ॥१५॥

कराला धूम्रकेशीश्च रक्षसीर्विकृताननाः ।
पिबन्तीः सततं पानं सदा मांससुराप्रियाः ॥१६॥

मांसशोणितदिग्धाङ्गीर्मांसशोणितभोजनाः ।
ता ददर्श कपिश्रेष्ठो रोमहर्षणदर्शनाः ॥१७॥

स्कन्धवन्तमुपासीनाः परिवार्य वनस्पतिम् ।
तस्याधस्ताच्च तां देवीं राजपुत्रीमनिन्दिताम् ॥१८॥

लक्षयामास लक्ष्मीवान्हनूमाञ्जनकात्मजाम् ।
निष्प्रभां शोकसन्तप्तां मलसङ्कुलमूर्धजाम् ॥१९॥

क्षीणपुण्यां च्युतां भूमौ तारां निपतिताम् इव ।
चारित्र्य व्यपदेशाढ्यां भर्तृदर्शनदुर्गताम् ॥२०॥

भूषणैरुत्तमैर्हीनां भर्तृवात्सल्यभूषिताम् ।
राक्षसाधिपसंरुद्धां बन्धुभिश्च विनाकृताम् ॥२१॥

वियूथां सिंहसंरुद्धां बद्धां गजवधूम् इव ।
चन्द्रलेखां पयोदान्ते शारदाभ्रैरिवावृताम् ॥२२॥

क्लिष्टरूपामसंस्पर्शादयुक्तामिव वल्लकीम् ।
सीतां भर्तृहिते युक्तामयुक्तां रक्षसां वशे ॥२३॥

अशोकवनिकामध्ये शोकसागरमास्लुताम् ।
ताभिः परिवृतां तत्र सग्रहामिव रोहिणीम् ॥२४॥

ददर्श हनुमान्देवीं लतामकुसुमाम् इव ।
सा मलेन च दिग्धाङ्गी वपुषा चाप्यलङ्कृता ॥२५॥

मृणाली पङ्कदिग्धेव विभाति च न भाति च ।

मलिनेन तु वस्त्रेण परिक्लिष्टेन भामिनीम् ॥ २६ ॥

संवृतां मृगशावाक्षीं ददर्श हनुमान्कपिः ।
तां देवीं दीनवदनामदीनां भर्तृतेजसा ॥ २७ ॥

रक्षितां स्वेन शीलेन सीतामसितलोचनाम् ।
तां दृष्ट्वा हनुमान्सीतां मृगशावनिभेक्षणाम् ॥ २८ ॥

मृगकन्यामिव त्रस्तां वीक्षमाणां समन्ततः ।
दहन्तीमिव निःश्वासैर्वृक्षान्पल्लवधारिणः ॥ २९ ॥

सङ्घातमिव शोकानां दुःखस्योर्मिमिवोत्थिताम् ।
तां क्षामां सुविभक्ताङ्गीं विनाभरणशोभिनीम् ॥ ३० ॥

प्रहर्षमतुलं लेभे मारुतिः प्रेक्ष्य मैथिलीम् ।
हर्षजानि च सोऽश्रूणि तां दृष्ट्वा मदिरेक्षणाम् ॥ ३१ ॥

मुमोच हनुमांस्तत्र नमश्चक्रे च राघवम् ।
नमस्कृत्वा च रामाय लक्ष्मणाय च वीर्यवान् ॥ ३२ ॥

सीतादर्शनसंहृष्टो हनूमान्संवृतोऽभवत् ॥ ३३ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com